National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(62): 243-247
© 2025 NJHSR
www.sanskritarticle.com

**शृङ्गारं साईतेजः**
विद्यावारिधि- शोधच्छात्रः,
ज्योतिषवास्तु-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**Correspondence:**
**शृङ्गारं साईतेजः**
विद्यावारिधि- शोधच्छात्रः,
ज्योतिषवास्तु-विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

# संहितास्कन्धोक्तदिशा आध्यात्मिकविषयाणां परिशीलनम्

**Srungaram Saiteja**

**आध्यात्मिकतायाः व्युत्पत्तिः**

'आध्यात्मिकता' इति पदं 'अध्यात्म' शब्दात् निष्पन्नम् अस्ति। 'अधि' उपसर्गपूर्वकात् 'आत्मन्' शब्दात् 'अध्यात्म' इति रूपं सिद्ध्यति। संस्कृतव्याकरणदृष्ट्या 'आत्मानम् अधिकृत्य भवम्' इति अध्यात्म-शब्दस्य सामान्यः अर्थः स्वीक्रियते। अर्थात् यत् ज्ञानं, चिन्तनं वा आत्मस्वरूपस्य विषयं भवति तत् अध्यात्मम् इत्युच्यते।

भगवद्गीतायाम् अध्यात्मशब्दस्य परिभाषा प्रदत्ता दृश्यते—

**"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।"**[1]

अस्य श्लोकस्य अनुसारं जीवस्य स्वभावः, आत्मस्वरूपं वा अध्यात्मम् इति कथ्यते। उपनिषद्सु अपि आत्मविद्यायाः विवेचनं अध्यात्मविद्याया मूलाधाररूपेण प्रतिपादितम् अस्ति। छान्दोग्योपनिषदि, बृहदारण्यकोपनिषदि, कठोपनिषदि च आत्मतत्त्वस्य गम्भीरविवेचनं दृश्यते।

आध्यात्मिकता न केवलं धार्मिककर्मकाण्डपर्यन्तं सीमिता अस्ति। सा मानवस्य अन्तःकरणस्य शुद्धिं, आत्मबोधं, आत्मानुशीलनं, नैतिकजीवनं तथा परमसत्यस्य अन्वेषणं च समावेशयति। अतः आध्यात्मिकता नाम आत्मनि केन्द्रितं जीवनदर्शनम् इति वक्तुं शक्यते।

भारतीयपरम्परायां आध्यात्मिकतायाः स्वरूपं बहुविस्तृतम् अस्ति। ध्यानम्, योगः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम्, यज्ञः, दानम्, तीर्थयात्रा, मन्त्रजपः इत्यादयः सर्वे आध्यात्मिकसाधनारूपेण स्वीक्रियन्ते। एतेषां माध्यमेन मनुष्यः आत्मोन्नतिं प्राप्तुं शक्नोति इति भारतीयानां दृढविश्वासः आसीत्।

**भारतीयदर्शनपरम्परायाम् आध्यात्मिकता**

भारतीयदर्शनस्य मूलाधारः अध्यात्ममेव अस्ति। पाश्चात्यदर्शनं यत्र मुख्यतया ज्ञानमीमांसां तथा तर्कप्रधानचिन्तनं प्राधान्येन स्वीकरोति, तत्र भारतीयदर्शनस्य लक्ष्यं दुःखनिवृत्तिः तथा मोक्षप्राप्तिः इति दृश्यते।

षड्दर्शनेषु प्रत्येकं दर्शनम् आध्यात्मिकतायाः विशिष्टस्वरूपं निरूपयति। न्यायदर्शनं तत्त्वज्ञानद्वारा मोक्षप्राप्तिं प्रतिपादयति। वैशेषिकदर्शनं पदार्थस्वरूपज्ञानं मोक्षस्य साधनं मन्यते। सांख्यदर्शनं पुरुष-प्रकृत्योर्विवेकज्ञानं मोक्षहेतुतया स्वीकरोति। योगदर्शनं चित्तवृत्तिनिरोधेन आत्मसाक्षात्कारस्य मार्गं दर्शयति। पूर्वमीमांसादर्शनं वैदिककर्मणां महत्त्वं प्रतिपादयति, यदा वेदान्तदर्शनं ब्रह्मात्मैक्यज्ञानं मोक्षस्य परमसाधनं मन्यते।

उपनिषदः भारतीयाध्यात्मिकचिन्तनस्य मूलस्रोतः सन्ति। तत्र "तत्त्वमसि", "अहं ब्रह्मास्मि", "अयमात्मा ब्रह्म" इत्यादीनि महावाक्यानि जीवात्मपरमात्मनोः अभेदं प्रतिपादयन्ति। एषा भावना भारतीयाध्यात्मिकतायाः केन्द्रबिन्दुः अस्ति।

भगवद्गीतायां ज्ञानयोगः, कर्मयोगः, भक्तियोगश्च आध्यात्मिकजीवनस्य त्रयः प्रमुखमार्गाः निरूपिताः। तत्र धर्मपालनं, निष्कामकर्म, ईश्वरभक्तिः, आत्मसंयमः तथा समत्वभावः आध्यात्मिकोन्नतेः आवश्यकतत्त्वरूपेण प्रतिपादिताः सन्ति।

जैनदर्शने आत्मशुद्धिः, अहिंसा, अपरिग्रहः तथा तपः आध्यात्मिकजीवनस्य आधारभूततत्त्वानि सन्ति। बौद्धदर्शने निर्वाणप्राप्तिः, मध्यममार्गः, करुणा तथा प्रज्ञा आध्यात्मिकविकासस्य साधनानि मन्यन्ते। एवं भारतीयदर्शनपरम्परायां विविधमार्गेषु आध्यात्मिकतायाः समृद्धपरम्परा दृश्यते।

**अध्यात्मस्य ज्योतिषस्य च सम्बन्धः**

भारतीयसंस्कृतौ धर्मः, अध्यात्मं तथा ज्यौतिषम् एते त्रयः परस्परम् अविनाभावसम्बद्धाः सन्ति। धर्मः मानवजीवनस्य आचारसंहितां निर्दिशति, अध्यात्मं जीवनस्य परमलक्ष्यं प्रतिपादयति, ज्यौतिषं च तयोः साधनरूपेण कालज्ञानं तथा मार्गदर्शनं प्रददाति।

धर्मशास्त्रेषु वर्णिताः यज्ञाः, संस्काराः, व्रतानि, उत्सवाः तथा धार्मिककर्माणि सर्वाणि कालविशेषे सम्पन्नानि भवन्ति। तेषां कालस्य निर्धारणं ज्यौतिषशास्त्राधीनं भवति। अतः धर्मस्य व्यवहारिकपक्षः ज्यौतिषेण नियन्त्रितः दृश्यते।

अध्यात्ममार्गे अपि ज्यौतिषस्य महत्त्वपूर्णा भूमिका अस्ति। ध्यानम्, जपः, उपासना, दीक्षा, यज्ञः, तीर्थयात्रा इत्यादीनां शुभकालस्य निर्णयः ज्यौतिषविद्यया क्रियते। ग्रहाणां, नक्षत्राणां तथा कालचक्रस्य प्रभावः मानवजीवने स्वीक्रियते स्म। अतः आध्यात्मिकसाधनानां सफलतायै ज्यौतिषीयनिर्देशाः उपयुज्यन्ते।

वेदाङ्गत्वेन ज्यौतिषस्य उद्देश्यं वेदविहितकर्मणां सम्यक् सम्पादनम् आसीत्। प्रसिद्धं वचनम् अस्ति—

**"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥"**[2]

अस्य अनुसारं यज्ञादिधार्मिककर्मणां सफलसम्पादनाय कालज्ञानं अनिवार्यम् अस्ति, तथा कालज्ञानस्य आधारः ज्यौतिषमेव अस्ति।

धर्मः यदि शरीररूपः स्यात् तर्हि अध्यात्मं तस्य प्राणः, ज्यौतिषं च तस्य नेत्ररूपेण कार्यं करोति। एतेषां त्रयाणां समन्वयेन भारतीयसंस्कृतेः धार्मिक-आध्यात्मिकजीवनव्यवस्था निर्मिता अस्ति।

**संहितास्कन्धे आध्यात्मिकतायाः अवधारणा**

भारतीयज्ञानपरम्परायां अध्यात्मविद्यायाः स्थानम् अत्यन्तमहत्त्व-पूर्णम् अस्ति। मानवजीवनस्य परमपुरुषार्थः आत्मसाक्षात्कारः, मोक्षप्राप्तिः, परमात्मसाक्षात्कारश्च मन्यते। एतादृशं लक्ष्यं साधयितुं भारतीयाः ऋषयः विविधशास्त्राणां निर्माणम् अकुर्वन्। वेदाः, उपनिषदः, दर्शनानि, पुराणानि, स्मृतयः तथा ज्यौतिषशास्त्रमपि मानवस्य भौतिक-आध्यात्मिक-उन्नतये मार्गदर्शनं कुर्वन्ति। ज्यौतिष-शास्त्रस्य त्रिषु स्कन्धेषु संहितास्कन्धः विशेषरूपेण लोकजीवनस्य विविधपक्षान् निरूपयति। अस्मिन् स्कन्धे केवलं भौतिकघटनानां वर्णनमेव नास्ति, अपितु धर्म, संस्कार, देवपूजा, यज्ञ, दान, तीर्थयात्रा, शकुननिमित्तादिविषयकाः आध्यात्मिकतत्त्वानि अपि सम्यक् प्रतिपादितानि सन्ति।

संहितास्कन्धस्य अध्ययनात् ज्ञायते यत् भारतीयज्योतिषविद्यायाः उद्देश्यं केवलं भविष्यवाणीकरणं नासीत्, प्रत्युत मानवस्य आन्तरिकपरिष्कारः, धार्मिकजीवनस्य संरक्षणं तथा आध्यात्मिक-प्रगतिः अपि तस्य प्रमुखलक्ष्येषु अन्तर्भूतासीत्। अतः संहितास्कन्धे प्रतिपादितानाम् आध्यात्मिकविषयाणां सम्यगवलोकनं आवश्यकम् अस्ति।

संहितास्कन्धः ज्यौतिषशास्त्रस्य लोकव्यवहारप्रधानः विभागः अस्ति। अस्मिन् केवलं ग्रहगणनाः वा ज्योतिषीयसूत्राणि न प्रतिपादितानि, अपितु समाजस्य धार्मिक-सांस्कृतिक-आध्यात्मिकजीवनस्य विस्तृतं चित्रं प्रदर्शितम् अस्ति।

विशेषतः वराहमिहिरकृतायां बृहत्संहिता देवपूजा, देवालयनिर्माणम्, मूर्तिलक्षणानि, ग्रहयागाः, वर्षाफलविचारः, शकुनशास्त्रम्, तीर्थमहिमा, वृक्षारोपणम्, दानविधानम्, राजधर्मः इत्यादयः बहवः विषयाः विवृताः सन्ति। एते सर्वे विषयाः प्रत्यक्षतया वा परोक्षतया वा आध्यात्मिकजीवनस्य संवर्धनमेव कुर्वन्ति।

संहितास्कन्धदृष्ट्या अध्यात्मस्य स्वरूपं केवलं मोक्षकेन्द्रितं नास्ति, अपितु लोककल्याणप्रधानम् अस्ति। यज्ञाः वर्षासम्पत्त्यर्थं, ग्रहशान्तयः जनकल्याणार्थं, दानानि सामाजिकसामञ्जस्यार्थं, देवपूजाः मानसिक-शान्त्यर्थं च प्रतिपादिताः दृश्यन्ते। अनेन ज्ञायते यत् संहिताकाराः अध्यात्मं सामाजिककल्याणेन सह सम्बद्धं मन्यन्ते स्म।

संहितास्कन्धे प्रकृतिपूजनस्य भावना अपि दृश्यते। सूर्यः, चन्द्रः, ग्रहाः, नक्षत्राणि, पर्वताः, नद्यः, वृक्षाः च पवित्रतत्त्वत्वेन स्वीकृतानि सन्ति। एषा भावना मानवस्य प्रकृत्या सह आध्यात्मिकसम्बन्धं दृढं करोति।

तथैव शकुननिमित्तविचारेषु अपि ब्रह्माण्डस्य प्रत्येकघटनायाः आध्यात्मिकसन्देशत्वं स्वीकृतम् अस्ति। एतेन मानवः विश्वव्यापिनः दैवीयव्यवस्थायाः अंशरूपेण स्वात्मानं पश्यति। एषा दृष्टिः भारतीयाध्यात्मिकचिन्तनस्य विशिष्टलक्षणम् अस्ति।

संहितास्कन्धस्य आध्यात्मिकदृष्टिकोणः समन्वयात्मकः अस्ति। अत्र धर्मः, विज्ञानम्, समाजजीवनम्, प्रकृतिः तथा अध्यात्मम् एतानि पृथक् विषयाः न सन्ति, अपितु परस्परसम्बद्धानि तत्त्वानि सन्ति। अनेन संहितास्कन्धः केवलं ज्यौतिषग्रन्थः न भवति, अपितु भारतीयजीवनदर्शनस्य एकः महत्त्वपूर्णः दस्तावेजः इव प्रतीयते।

उपर्युक्तविवेचनात् स्पष्टं भवति यत् आध्यात्मिकता भारतीयसंस्कृतेः मूलाधारः अस्ति। आत्मसाक्षात्कारः, नैतिकजीवनम्, ईश्वरभक्तिः, लोककल्याणभावना तथा मोक्षप्राप्तिः एते सर्वे आध्यात्मिकतायाः प्रमुखाः आयामाः सन्ति। भारतीयदर्शनपरम्परा एतान् तत्त्वान् विविधरीत्या प्रतिपादयति। धर्मः, अध्यात्मं तथा ज्यौतिषम् एते त्रयः भारतीयजीवनव्यवस्थायां परस्परपूरकत्वेन स्थिताः सन्ति।

संहितास्कन्धे प्रतिपादितानि देवपूजा, यज्ञम्, दानम्, तीर्थयात्रा, ग्रहशान्ति, शकुननिमित्तविचाराः इत्यादयः विषयाः केवलं धार्मिकाचाराः न सन्ति, अपितु मानवस्य आन्तरिकशुद्धिं, सामाजिकसामञ्जस्यं तथा आध्यात्मिकविकासं साधयितुं प्रयत्नशीलाः तत्त्वानि सन्ति। अतः संहितास्कन्धः भारतीयाध्यात्मिकपरम्परायाः एकं महत्त्वपूर्णं दर्पणरूपं ग्रन्थराशिम् उपस्थापयति।

**वास्तुशान्तेः आध्यात्मिकमहत्त्वं तथा वास्तुदोषनिवारणे तस्य भूमिका**

संहितास्कन्धे प्रतिपादितेषु विविधेषु विषयेषु वास्तुशास्त्रस्य विशिष्टं स्थानं दृश्यते। ज्योतिषशास्त्रस्य संहितास्कन्धः केवलं ग्रह-नक्षत्र-विचारपरः नास्ति, अपितु मानवजीवनस्य लौकिक–पारलौकिक-कल्याणसम्बद्धानां विषयाणामपि विस्तृतं विवेचनं करोति। तेषु वास्तुशास्त्रम् एकः महत्त्वपूर्णः विषयः अस्ति। वास्तुशास्त्रस्य उद्देश्यं केवलं गृहनिर्माणस्य तकनीकीविधानं न, अपितु मनुष्यस्य निवासस्थानं प्रकृतेः दिव्यशक्तीनां च अनुकूलतया व्यवस्थापयि-तुमस्ति। एतस्मात् कारणात् वास्तुशास्त्रं भारतीयपरम्परायां अध्यात्मविद्याया सह घनिष्ठसम्बन्धं धारयति।

भारतीयसंस्कृतौ गृहं केवलं निवासस्थानमिति न मन्यते, अपितु तत् एकं पवित्रं क्षेत्रं, यत्र परिवारस्य धर्माचरणं, देवपूजनं, संस्काराः, सामाजिकव्यवहाराः च सम्पद्यन्ते। अतः गृहस्य निर्माणे भूमेः चयनात् आरभ्य अन्तिमप्रवेशपर्यन्तं सर्वत्र शास्त्रीयविधीनाम् अनुसरणं आवश्यकमिति मन्यते। वास्तुशास्त्रे निर्देशितं यत् भवननिर्माणार्थं यथासम्भवं वास्तुदोषरहिता भूमिः एव ग्राह्या। भूमेः आकारः, दिशा, स्तरः, जलसन्निधिः, भूमेर्गुणधर्माः, भूमेः ऊर्जा च विचार्य एव गृहनिर्माणं करणीयम्। यदि भूमौ दोषाः सन्ति, तर्हि ते गृहवासिनां

जीवने प्रतिकूलप्रभावं जनयितुं शक्नुवन्ति इति वास्तुशास्त्रस्य अभिप्रायः।

तथापि व्यवहारजगति सर्वदा दोषरहितभूमेः प्राप्तिः न सुलभा भवति। विशेषतः आधुनिकनगरीयपरिवेशे सीमितभूमेः, जनसंख्यावृद्धेः, आर्थिकपरिस्थितीनां च कारणात् वास्तुशास्त्रस्य सर्वे नियमाः पूर्णतया परिपालयितुं न शक्यन्ते। बहुमञ्जिलभवननिर्माणम्, सीमित-भूमिक्षेत्रम्, नगरयोजनानियमाः, आर्थिकबाधाः इत्यादिकारणैः अनेकवारं वास्तुदोषयुक्तेषु भूखण्डेषु एव गृहनिर्माणं क्रियते। एतादृशे सन्दर्भे वास्तुशास्त्रं व्यावहारिकदृष्टिम् अपनयति। यत्र सर्वथा दोषरहितः भूखण्डः न लभ्यते, तत्र दोषाल्पत्वं गुणाधिक्यं च यत्र भवति तादृशः भूखण्डः ग्राह्यः इति निर्दिश्यते। भवनस्य आन्तरिकव्यवस्थायामपि एष एव सिद्धान्तः स्वीक्रियते। यथा दोषाः न्यूनाः भवन्ति तथा गुणाः अधिकाः भवन्ति इति दृष्ट्या गृहस्य विभागविन्यासः, कक्षानां व्यवस्था, देवगृहस्य स्थानम्, पाकशालाया विन्यासः, शयनकक्षस्य दिशा, जलस्थानानि, द्वाराणि च विनियोज्यन्ते।

वास्तुशास्त्रे विविधप्रकारकाः वास्तुदोषाः वर्णिताः सन्ति। दिशाविपरीतगृहनिर्माणम्, ईशानकोणस्य दूषणम्, अग्निकोणस्य विकारः, ब्रह्मस्थानस्य अवरोधः, मुख्यद्वारस्य अनुचितस्थानम्, भूमेः विकृताकारः, जलस्थानस्य अनुचितविन्यासः, भारवितरणस्य असन्तुलनम् इत्यादयः दोषाः वास्तुदोषरूपेण परिगण्यन्ते। एतेषां दोषाणां निवारणार्थं वास्तुग्रन्थेषु अनेकाः परिहारविधयः निर्दिष्टाः सन्ति। कदाचित् संरचनात्मकपरिवर्तनैः, कदाचित् यन्त्र-तन्त्र-मन्त्रादिभिः, कदाचित् विशेषपूजाभिः एते दोषाः शमयितुं प्रयत्नः क्रियते।

परन्तु सर्वेषु प्रसङ्गेषु एते परिहारविधयः सुलभतया आचरितुं न शक्यन्ते। निर्मितस्य गृहस्य संरचनां परिवर्तयितुं बहुधा अत्यधिकव्ययः भवति। अपरेषु स्थलेषु वास्तुगतदोषानां संशोधनं तांत्रिकदृष्ट्या असम्भवमेव भवति। एतादृशपरिस्थितौ वास्तुशास्त्रे वास्तुशान्तेः विशेषमहत्त्वं प्रतिपादितम् अस्ति। वास्तुदोषाणां निवारणाय, नकारात्मकप्रभावानां शमनाय, गृहे शुभशक्तीनां संवर्धनाय च वास्तुशान्तिः अत्यावश्यकविधिरूपेण स्वीक्रियते।

वास्तुशान्तिः नाम कर्मकाण्डशास्त्रोक्तविधिना देवताराधनपूर्वकं वास्तुदोषनिवारणप्रक्रिया। अस्याः मूलभावना एषा यत् भवनं केवलं जडसंरचना नास्ति, अपितु तस्मिन् विविधाः सूक्ष्मशक्तयः, दिशादेवताः, भूमिदेवता, पञ्चमहाभूतानि, ग्रहाः, प्राकृतिकशक्तयः च प्रभावं वहन्ति। यदा तेषां सम्यक् सम्मानः, पूजनं, तर्पणं च क्रियते तदा ताः शक्तयः प्रसन्नाः भूत्वा गृहवासिनां कल्याणं कुर्वन्ति। एषः विचारः भारतीयाध्यात्मिकपरम्परायां अत्यन्तं प्राचीनः अस्ति।

वास्तुशान्तिकर्मणि विशेषतया अष्टदिक्पालकानां पूजनं क्रियते। पूर्वस्य इन्द्रः, आग्नेयस्य अग्निः, दक्षिणस्य यमः, नैरृत्यस्य नैरृतिः, पश्चिमस्य वरुणः, वायव्यस्य वायुः, उत्तरस्य कुबेरः, ईशानस्य ईशानः च दिशारक्षकदेवतारूपेण पूज्यन्ते। एतदतिरिक्तं पृथिवी, आपः, तेजः, वायुः, आकाशः इति पञ्चमहाभूतानां सम्मानः अपि क्रियते। वास्तुशास्त्रस्य दृष्ट्या भवनं एतेषां पञ्चतत्त्वानां समन्वितरूपमेव अस्ति। अतः तेषां तत्त्वानां सन्तुलनं गृहस्य शान्तिसमृद्ध्योः मूलकारणं भवति।

वास्तुशान्तेः महत्त्वं ज्योतिषशास्त्रे ग्रहशान्त्या सह अपि सम्बद्धं दृश्यते। गृहनिर्माणं, गृहप्रवेशः, नूतनकार्यस्य आरम्भः, प्रतिष्ठादिकर्म च ग्रहशान्त्या सह कर्तव्यं मन्यते। तदेव शास्त्रेषु उक्तम्—

**कार्यारम्भेषु सर्वेषु नववेश्मप्रवेशने।**
**ग्रहशान्तिविधानेन कृत्वाभीष्टं समश्नुते॥**[3]

अस्य श्लोकस्य तात्पर्यम् अस्ति यत् सर्वेषु शुभकार्यारम्भेषु, विशेषतः नवनिर्मितगृहप्रवेशे, ग्रहशान्तेः विधानं कृत्वा मनुष्यः स्वाभीष्टफलानि प्राप्नोति। अतः वास्तुशान्तिः केवलं वास्तुदोषनिवारणविधिः न, अपितु ग्रहशान्त्या सह संयुक्ता समग्रकल्याणप्रक्रिया अस्ति।

वास्तुग्रन्थेषु, विशेषतः बृहद्वास्तुमालायाम्, वास्तुशान्तेः विस्तृतवर्णनं प्राप्यते। तत्र ब्राह्मणानां महत्त्वं, वेदमन्त्रजपस्य प्रभावः, होमयज्ञस्य आवश्यकता, दानधर्मस्य महिमा च प्रतिपादिताः सन्ति। शास्त्रकाराः मन्यन्ते यत् वेदविदः ब्राह्मणाः यज्ञजपहोमादिकर्मणा देवतानां प्रसादं सम्पादयन्ति तथा च वातावरणस्य शुद्धिं कुर्वन्ति। वेदमन्त्राणां स्पन्दनात्मकशक्तिः वातावरणे शुभभावनां जनयति इति भारतीयपरम्परायाः विश्वासः अस्ति।

पूजाविधीनां वर्गीकरणे वास्तुशान्तिः शान्तिककर्मसु अन्तर्भवति। शास्त्रेषु पूजाविधयः द्विधा वर्णिताः—शान्तिककर्माणि तथा पौष्टिककर्माणि। यानि कर्माणि विघ्नबाधानां निवारणार्थं क्रियन्ते तानि शान्तिककर्माणि कथ्यन्ते। यानि कर्माणि सुखसमृद्धिवृद्ध्यर्थं भवन्ति तानि पौष्टिककर्माणि उच्यन्ते। वास्तुदोषाः बाधारूपत्वेन परिगण्यन्ते, अतः तेषां निवारणाय क्रियमाणा वास्तुशान्तिः शान्तिककर्मरूपेण व्यवह्रियते।

अध्यात्मदृष्ट्या विचार्यमाणे वास्तुशान्तेः अत्यन्तं गम्भीरः अर्थः दृश्यते। एषा केवलं बाह्यकर्मकाण्डमात्रं नास्ति। वस्तुतः एषा मानवस्य प्रकृतेः, दिशाशक्तीनां, देवतानां, ब्रह्माण्डीयव्यवस्थायाः च प्रति कृतज्ञताभावस्य अभिव्यक्तिः अस्ति। यदा मनुष्यः नम्रतया देवतानां पूजनं करोति, तदा तस्य अन्तःकरणे श्रद्धा, शुद्धता, सकारात्मकता च वर्धते। एते मानसिकभावाः एव गृहे सौहार्दपूर्णं वातावरणं निर्मान्ति। अतः वास्तुशान्तेः प्रभावः केवलं आध्यात्मिकः न, अपितु मनोवैज्ञानिकः सामाजिकश्च अस्ति।

वास्तुशान्त्याः अनुष्ठानेन गृहस्य अन्तः विद्यमानानां नकारात्मकभावनानां, भयस्य, असुरक्षाबोधस्य च शमनं भवति। गृहवासिनः नवविश्वासेन, नवोत्साहेन, नवसकारात्मकतया च जीवनं यापयितुं प्रवर्तन्ते। फलतः गृहे सुखं, शान्तिः, स्वास्थ्यं, समृद्धिः, पारिवारिकसौहार्दं च वर्धते। अष्टदिक्पालकानां कृपा, ग्रहाणां अनुकूलता, पञ्चमहाभूतानां सन्तुलनं च प्राप्तमिति भावनया जनाः आत्मिकसन्तोषं प्राप्नुवन्ति।

अतः निष्कर्षतः वक्तुं शक्यते यत् वास्तुशान्तिः वास्तुशास्त्रस्य एकः महत्त्वपूर्णः आध्यात्मिकोपायः अस्ति। आधुनिकजीवने यत्र सर्वेषां वास्तुनियमानां पालनं सुलभं नास्ति, तत्र वास्तुशान्तिः दोषनिवारणस्य,मानसिकशान्तेः,आध्यात्मिकसन्तुलनस्य, सामाजिक-सौहार्दस्य च प्रभावी साधनरूपेण प्रतिष्ठिता अस्ति। संहितास्कन्धे प्रतिपादितस्य अध्यात्मदर्शनस्य व्यावहारिकरूपमेव वास्तुशान्तिः इति कथयितुं शक्यते। सा मनुष्यं प्रकृतेः, देवताशक्तीनां, ब्रह्माण्डव्यवस्थायाश्च सह पुनः समन्वययति तथा तस्य जीवने शान्तिं, सौभाग्यं, समृद्धिं च संवर्धयति।

कर्मकाण्डशास्त्रे निर्दिष्टविधिना देवतानामाराधनं, मन्त्रजपः, होमः, दानम्, ब्राह्मणसत्कारः, ग्रहपूजनम्, दिक्पालपूजनम्, वास्तुपुरुष-पूजनम् इत्यादीनां समुचितसम्पादनद्वारा यः वास्तुदोषनिवारण-विधिः क्रियते, स एव वास्तुशान्तिः इति कथ्यते। भारतीयपरम्परायां

वास्तुशान्तिः केवलं कर्मकाण्डमात्रं नास्ति, अपितु सा मनुष्यस्य, प्रकृतेः, देवतानां, ब्रह्माण्डव्यवस्थायाश्च मध्ये सामञ्जस्यस्थापनस्य एकः आध्यात्मिकप्रयत्नः अस्ति। यदा भवननिर्माणे, भूमिचयने, गृहविन्यासे वा कश्चित् दोषः जायते, तदा तस्य दोषस्य आधिभौतिकप्रभावस्य शमनार्थं तथा सूक्ष्मशक्तीनां प्रसादनार्थं वास्तुशान्तिः विधीयते।

कर्मकाण्डग्रन्थेषु वास्तुशान्तेः विधिः अत्यन्तं विस्तारपूर्वकं वर्णितः अस्ति। तत्र पुण्याहवाचनम्, गणपतिपूजनम्, कलशस्थापनम्, नवग्रहपूजनम्, वास्तुपुरुषपूजनम्, दिक्पालपूजनम्, होमः, पूर्णाहुतिः, ब्राह्मणभोजनम्, दक्षिणादानम् इत्यादयः अनेकाः अङ्गाः निर्दिष्टाः सन्ति। एतेषां सर्वेषाम् उद्देश्यं भवनस्य आध्यात्मिकपरिशोधनं, देवशक्तीनां आह्वानं, नकारात्मकप्रभावानां निवारणं च भवति।

बृहद्वास्तुमालायां वास्तुशान्तेः प्रसङ्गे ब्राह्मणानां महत्त्वं विशेषतया प्रतिपादितम्। उक्तेषु श्लोकेषु ब्राह्मणाः वेदज्ञानस्य धारकाः, धर्ममार्गस्य निर्देशकाः, यज्ञ-होमादीनां सम्पादकाः तथा लोककल्याणस्य साधकाः इति वर्णिताः सन्ति—

**ब्राह्मणाः सन्तु शास्तारः पापात्पान्तु समाहिताः ।**
**वेदानां चैव दातारः पातारः सर्वदेहिनाम् ॥**
**जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ।**
**देवानां च ऋषीणां च तृप्त्यर्थं याजकाः स्मृताः ॥**
**येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् ।**
**रक्षन्तु सततं ते मां जपे यज्ञे व्यवस्थिताः ॥**
**ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।**
**तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः ॥**
**पावनाः सर्ववर्णानां विश्रुता ब्रह्मरूपिणः ।**
**सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥**
**सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ।**[4]

अस्य भावः अस्ति यत् वेदविदः ब्राह्मणाः समाजस्य आध्यात्मिकमार्गदर्शकाः भवन्ति। ते स्वस्य ज्ञानशक्त्या जनान् धर्ममार्गे स्थापयन्ति तथा पापकर्मभ्यः संरक्षणं कुर्वन्ति। वास्तुशान्तौ तेषां सहभागः केवलं विधिपालनार्थं न, अपितु वेदमन्त्राणां शक्तेः माध्यमेन पवित्रवातावरणनिर्माणार्थं भवति।

जपः, यज्ञः, होमः, दानम् इत्यादयः केवलं बाह्यक्रियाः न, अपितु देवऋषिपरम्परायाः प्रति कृतज्ञताभावस्य अभिव्यक्तयः सन्ति। यदा मनुष्यः एतानि कर्माणि श्रद्धया करोति, तदा सः आत्मनः अहंकारं न्यूनं कृत्वा ब्रह्माण्डीयव्यवस्थायाः एकः अंशः इति अनुभवति। एषा भावना एव अध्यात्मस्य मूलाधारः अस्ति।

वास्तुशान्तेः आध्यात्मिकदृष्ट्या परमं महत्त्वं मन्त्रशक्तौ निहितम् अस्ति। शास्त्रकाराः मन्यन्ते यत् वेदमन्त्राः केवलं शब्दाः न सन्ति, किन्तु चेतनशक्तेः वाहकाः सन्ति। तेषां उच्चारणेन वातावरणे सूक्ष्मतरङ्गाः उत्पद्यन्ते, ये मानसिकशुद्धिं, चित्तैकाग्रतां, आध्यात्मिकप्रसन्नतां च जनयन्ति।

अस्य तात्पर्यम् अस्ति यत् ये वेदविदः सन्ति, तेषां माध्यमेन प्रवहन्ती वैदिकीशक्तिः सम्पूर्णवातावरणं पवित्रं करोति। वास्तुशान्तौ मन्त्रजपस्य प्रधानता एतस्मादेव कारणात् स्वीक्रियते।

आध्यात्मिकदृष्ट्या वास्तुशान्तिः वस्तुतः गृहस्य संस्कारः इति कथयितुं शक्यते। यथा मनुष्यस्य जीवने जातकर्म, उपनयनम्, विवाहः इत्यादयः संस्काराः भवन्ति, तथैव गृहस्य अपि संस्काररूपेण वास्तुशान्तिः क्रियते। एतेन भवनं केवलं ईंट-काष्ठ-पाषाणसमूहः न भवति, अपितु पवित्रजीवनस्य केन्द्ररूपेण प्रतिष्ठितं भवति।

अत्र ब्राह्मणानां 'जङ्गमतीर्थ' इति विशेषणं प्रयुक्तम्। यथा तीर्थक्षेत्रे गमनं कृत्वा मनुष्यः आत्मशुद्धिं अनुभवति, तथैव वेदविदां सत्सङ्गेन, आशीर्वादेन, मन्त्रशक्त्या च आन्तरिकशुद्धिः जायते। वास्तुशान्तौ ब्राह्मणसत्कारस्य विधानम् अस्यैव आध्यात्मिकसिद्धान्तस्य प्रतिफलनम् अस्ति।

पञ्चमहाभूतसमन्वयः अपि वास्तुशान्तेः महत्त्वपूर्णः पक्षः अस्ति। भारतीयदर्शने सम्पूर्णं जगत् पृथिवी, आपः, तेजः, वायुः, आकाशः इति पञ्चमहाभूतात्मकं मन्यते। गृहं अपि एतेषां तत्त्वानां संयोजनमेव। यदा वास्तुशान्तिः क्रियते, तदा मन्त्रैः, होमैः, पूजाभिः च एतेषां तत्त्वानां प्रतीकात्मकसम्मानः क्रियते। फलतः मनुष्यस्य अन्तःकरणे प्रकृतेः प्रति आदरभावः वर्धते। एषा भावना आधुनिकपर्यावरणचिन्तनस्य अपि मूलतत्त्वेषु गणनीया अस्ति।

आध्यात्मिकदृष्ट्या वास्तुदोषः केवलं भवनस्य संरचनात्मकदोषः न, अपितु असन्तुलनस्य प्रतीकः अपि अस्ति। यदा गृहे कलहः, अशान्तिः, भयम्, मानसिकतनावः, असौहार्दं वा वर्धते, तदा तस्य समाधानार्थं वास्तुशान्तिः मनोवैज्ञानिकरूपेण अपि महत्त्वपूर्णा भवति। पूजाकर्मणि सहभागः, मन्त्रश्रवणम्, देवतास्मरणम्, सामूहिकप्रार्थना, आशीर्वादग्रहणम् इत्यादिभिः गृहवासिनां चित्ते श्रद्धा, आशा, सकारात्मकता च जागरूकता च उत्पद्यते।

एवञ्च यथाशास्त्रं सम्पादिता वास्तुशान्तिः भवनस्य दोषनिवारणस्य धार्मिकोपायः मात्रं नास्ति, अपितु सा आध्यात्मिकशुद्धेः, मानसिकसन्तुलनस्य, सामाजिकसौहार्दस्य, देवताप्रसादप्राप्तेः च साधनम् अस्ति। वास्तुशान्त्या गृहस्य वास्तुदोषाः शम्यन्ते, भवनस्य गुणाः वर्धन्ते, वातावरणं पवित्रं भवति, गृहवासिनां चित्तेषु शान्तिः, श्रद्धा, आत्मविश्वासः च विकसितः भवति। अतः भारतीयसंस्कृतौ वास्तुशान्तिः भवननिर्माणसम्बद्धेषु संस्कारेषु अत्यन्तं महत्त्वपूर्णा तथा आध्यात्मिकदृष्ट्या सार्थका परम्परा इति स्वीक्रियते।

उपर्युक्तः वास्तुशान्तिविधिः केवलं कर्मकाण्डात्मकः अनुष्ठानक्रमः नास्ति, अपितु सः भारतीयाध्यात्मिकपरम्परायाः अत्यन्तं गूढं तत्त्वचिन्तनं वहति। वास्तुशास्त्रस्य दार्शनिकाधारः एषः अस्ति यत् मनुष्यः, गृहं, प्रकृतिः, देवताः, ग्रहाः, दिशः, पञ्चमहाभूतानि च परस्परं सम्बद्धानि सन्ति। यदा एतेषु कस्यचित् स्तरस्य असन्तुलनं जायते तदा तस्य प्रभावः मानवजीवने दृश्यते। वास्तुशान्तेः प्रयोजनं तस्मिन् सन्तुलने पुनः प्रतिष्ठापनमेव भवति। अतः वास्तुशान्तिः न केवलं गृहस्य शुद्धिः, अपितु गृहवासिनां चित्तस्य, भावनानां, कर्मणां च शुद्धीकरणस्य एकः आध्यात्मिकसंस्कारः अस्ति।

गृहप्रवेशात् प्राक् वास्तुशान्तेः विधानं भारतीयसंस्कृतौ गृहस्य देवालयतुल्यत्वस्य द्योतकं भवति। यथा देवप्रतिष्ठायाः पूर्वं मन्दिरे शुद्धिकरणसंस्काराः क्रियन्ते, तथैव गृहमपि केवलं निवासस्थानं न मन्यते, अपितु धर्मपालनस्य, देवपूजनस्य, कुलपरम्परारक्षणस्य, संस्कारनिर्वाहस्य च केन्द्रमिति दृष्ट्या तस्य संस्काररूपेण वास्तुशान्तिः विधीयते। अनेन गृहस्य भौतिकसंरचना आध्यात्मिकचेतनया सह सम्बद्धा भवति।

वास्तुशान्त्याः प्रारम्भे गृहस्वामिना सपत्नीकेन शुद्धभावेन उपवेशनं विशेषार्थपूर्णम् अस्ति। भारतीयदर्शने गृहस्थाश्रमः स्त्रीपुरुषयोः संयुक्तधर्मपालनस्य आधारः अस्ति। अतः वास्तुशान्तौ दम्पत्योः

संयुक्तोपस्थितिः केवलं व्यवहारनियमः न, अपितु गृहजीवनस्य समन्वयात्मकस्वरूपस्य प्रतीकः अस्ति। शुद्धान्तःकरणेन कृतः सङ्कल्पः आत्मशुद्धेः, कर्तव्यनिष्ठायाः, ईश्वरसमर्पणस्य च द्योतकः भवति।

दीपप्रज्वालनस्य अपि गम्भीरः आध्यात्मिकार्थः अस्ति। दीपः ज्ञानस्य, चैतन्यस्य, आत्मप्रकाशस्य च प्रतीकः मन्यते। उपनिषदः अज्ञानरूपान्धकारात् ज्ञानरूपप्रकाशस्य प्राप्तिं जीवनस्य परमलक्ष्यं मन्यन्ते। अतः वास्तुशान्तौ दीपप्रज्वालनेन गृहे केवलं बाह्यप्रकाशस्य न, अपितु ज्ञान, सदाचार, आध्यात्मिकप्रकाशस्य च आह्वानं क्रियते।

दिग्रक्षाविधानस्य आध्यात्मिकमहत्त्वमपि उल्लेखनीयम्। दशदिक्षु सर्षपाक्षतानां विकिरणेन एषा भावना अभिव्यज्यते यत् मनुष्यः केवलं स्वार्थपरः जीवः नास्ति, अपितु सः विश्वव्यवस्थायाः एकः अंशः अस्ति। पूर्व, पश्चिम, उत्तर, दक्षिणादिदिशासु स्थिताः दिक्पालदेवताः ब्रह्माण्डस्य संरक्षणव्यवस्थायाः प्रतीकाः सन्ति। तेषां पूजनद्वारा गृहवासी सम्पूर्णविश्वव्यवस्थायाः प्रति आदरभावं प्रकटयति। अयं भावः अध्यात्मस्य मूलस्वरूपमेव अस्ति।

रक्षासूत्रबन्धनं केवलं शुभचिह्नं नास्ति। तस्य आध्यात्मिकार्थः आत्मसंयमस्य, धर्मपालनस्य, देवकृपायाः संरक्षणस्य च प्रतीकत्वे निहितः अस्ति। रक्षासूत्रं मनुष्यं स्मारयति यत् तस्य जीवनं केवलं भौतिकसफलतायै न, अपितु धर्म, कर्तव्य, सदाचारपालनाय अपि समर्पितं भवेत्।

गणपतिपूजायाः प्रधानता भारतीयाध्यात्मिकपरम्परायां सर्वविदिता। गणेशः विघ्नविनायकः, बुद्धेः अधिष्ठाता, आरम्भदेवता च मन्यते। वास्तुशान्तौ गणपतिपूजनस्य तात्पर्यम् अस्ति यत् गृहजीवने उत्पद्यमानानां सर्वविघ्नानां निवारणं भवतु तथा विवेकयुक्तं जीवनं प्राप्यताम्। आध्यात्मिकदृष्ट्या गणेशः अहङ्कारनाशस्य, विवेकस्य, अन्तर्बलस्य च प्रतीकः अस्ति।

कलशस्थापनस्य तु विशेषं दार्शनिकमहत्त्वं दृश्यते। भारतीयपरम्परायां कलशः सृष्टेः प्रतीकः मन्यते। तस्मिन् संस्थापितं जलं जीवनस्य मूलाधारः अस्ति। पञ्चपल्लवानि प्रकृतेः विकासशक्तिं सूचयन्ति। श्रीफलं पूर्णतायाः, समर्पणस्य, फलप्राप्तेः च प्रतीकं भवति। अतः कलशस्थापनं वस्तुतः सम्पूर्णसृष्टेः, प्रकृतेः, दिव्यचेतनायाश्च आह्वानम् अस्ति। अत्र मनुष्यः स्वगृहं विश्वब्रह्माण्डस्य सूक्ष्मप्रतिरूपमिति भावयति।

नवग्रहपूजायाः आध्यात्मिकमहत्त्वं केवलं ज्योतिषीयदोषशमनपर्यन्तं सीमितं नास्ति। भारतीयदर्शने ग्रहाः कालचक्रस्य, कर्मफलव्यवस्थायाः, विश्वगतिनियमनस्य च प्रतीकाः सन्ति। नवग्रहपूजनद्वारा मनुष्यः स्वकर्मफलानां प्रति सजगः भवति तथा ईश्वरनियन्त्रितस्य विश्वव्यवस्थायाः प्रति विनयभावं धारयति। ग्रहपूजा आत्मनि कर्मफलस्वीकारस्य, धैर्यस्य, श्रद्धायाश्च विकासं जनयति।

गौर्यादिमातृकापूजायां स्त्रीशक्तेः पूजनं क्रियते। भारतीयसंस्कृतौ सम्पूर्णजगतः मूलशक्तिः आदिशक्तिरूपेण स्वीकृता अस्ति। मातृकापूजायाः तात्पर्यम् अस्ति यत् गृहे करुणा, स्नेहः, पोषणम्, सृजनशीलता, सौहार्दं च वर्धेत। गृहस्य स्थैर्यं केवलं भित्तिभिः न, अपितु मातृशक्तेः अनुग्रहेण भवति इति भावना अत्र अन्तर्निहिता वर्तते।

वास्तुपूजा तु सम्पूर्णवास्तुशान्तिविधेः हृदयस्थलं भवति। वास्तुपुरुषः वास्तुशास्त्रे भूमेः चेतनस्वरूपस्य प्रतीकः मन्यते। तस्य शरीरस्थदेवतापूजनं वस्तुतः सम्पूर्णप्रकृतेः पूजनमेव अस्ति। एषा पूजा मनुष्यं स्मारयति यत् सः प्रकृतेः स्वामी नास्ति, किन्तु तस्याः अंशः अस्ति। अतः प्रकृतेः प्रति सम्मानः, कृतज्ञता, संरक्षणभावः च आध्यात्मिकजीवनस्य अनिवार्याङ्गानि सन्ति।

वास्तुपूजायाः फलश्रुतिषु यानि फलानि वर्णितानि शतवर्षपर्यन्तं सुखजीवनम्, स्वर्गसुखप्राप्तिः इत्यादीनि तानि केवलं लौकिकफलवर्णनानि न, अपितु तेषां प्रतीकात्मकः अर्थोऽपि ग्राह्यः। यः श्रद्धया, कृतज्ञतया, धर्मनिष्ठया च जीवनं यापयति, तस्य जीवनं स्वयमेव शान्तिमयं, सुखमयं, समृद्धिमयं च भवति। एष एव शास्त्रस्य अभिप्रायः।

सत्यनारायणकथावाचनस्य आध्यात्मिकसन्देशः सत्यपालनस्य महत्त्वं प्रतिपादयति। गृहस्य वास्तविकं सौभाग्यं न केवलं वास्तुरचनया, अपितु सत्य, धर्म, श्रद्धा, सदाचारैः च वर्धते। अतः वास्तुशान्तौ सत्यनारायणकथाया समावेशः गृहस्थजीवनस्य नैतिकाधारं दृढं करोति।

हवनस्य महत्त्वं अपि अत्यन्तं गम्भीरम् अस्ति। अग्निः भारतीयपरम्परायां शुद्धेः, परिवर्तनस्य, देवमानवसंवादस्य च प्रतीकः अस्ति। यदा हविषां आहुतिर्दीयते तदा मनुष्यः स्वस्य अहङ्कारं, दुराचारान्, अशुद्धभावनाः च प्रतीकात्मकरूपेण अग्नौ समर्पयति। अग्निः तान् दग्ध्वा शुद्धीकरणं करोति। अतः हवनं बाह्ययज्ञः एव न, अन्तःकरणशुद्धेः साधनमपि अस्ति।

पूर्णाहुतिः समर्पणस्य चरमावस्था मन्यते। नारिकेलफलस्य आहुतिर्दानं जीवने सम्पूर्णसमर्पणभावस्य प्रतीकं भवति। अत्र साधकः मनसा वाचा कर्मणा च ईश्वरकृपामेव स्वजीवनस्य आधारमिति स्वीकरोति।

अन्ते ब्राह्मणभोजनम्, दक्षिणादानम्, गोदानसङ्कल्पः, क्षमाप्रार्थना च भारतीयाध्यात्मिकजीवनस्य अत्यन्तमहत्त्वपूर्णानि तत्त्वानि प्रतिपादयन्ति। दानं त्यागस्य शिक्षां ददाति, ब्राह्मणसत्कारः ज्ञानस्य सम्मानं बोधयति, क्षमाप्रार्थना विनयस्य प्रतीकं भवति। यत्र विनयः, श्रद्धा, त्यागः, कृतज्ञता च विद्यन्ते, तत्रैव वास्तविकः आध्यात्मिकविकासः सम्भवति।

अतः वास्तुशान्तिविधिः केवलं वास्तुदोषनिवारणाय कृतः कर्मकाण्डः नास्ति, अपितु सः गृहस्य, गृहस्थस्य, परिवारस्य च आध्यात्मिकसंस्कारः अस्ति। अनेन मनुष्यः प्रकृतेः, देवतानां, पञ्चमहाभूतानां, ग्रहाणां, कुलपरम्परायाश्च सह पुनः सामञ्जस्यं स्थापयति। फलतः गृहे शान्तिः, सौहार्दम्, आध्यात्मिकता, सकारात्मकता, समृद्धिश्च वर्धते। एष एव वास्तुशान्तेः परमः आध्यात्मिकः सन्देशः।

**संदर्भग्रन्थाः**


1. वराहमिहिरः — *बृहत्संहिता*, दकार्गलाध्यायः।
2. भट्टोत्पलः — *बृहत्संहिताटीका*।
3. *बृहत्संहिता* विषयक आधुनिक जलविज्ञान-अध्ययनम्।
4. संहितास्कन्धविषयक अध्ययनसामग्री।


**संदर्भ**


1. मद्भगवद्गीता ८.३
2. दाङ्गज्योतिषम्
3. स्तुरत्नाकरः – परिशिष्टप्रकरणम् – श्लोकः ६६
4. हद्वास्तुमाला – वास्तुशान्तिपद्धतिः